# माहिषेयभाष्यसहितं तैत्तिरीयप्रातिशाख्यम्

प्रथमः प्रश्नः

प्रथमोऽध्यायः

अथ वर्णसमाम्नायः १

अथशब्दः शास्त्रादौ मङ्गल्य इत्युपदिश्यते । सोऽयं मङ्गलार्थः पुनः प्रयुज्यते यथा नः स्वस्ति च स्यात् साधुचाध्ययनं संवृत्तं त्वाचार्यशिष्ययोरिति । वर्णानां समाम्नायो वर्णसमाम्नायः । समित्येकीभावे । न आङ् मर्यादायाम् । आम्नाय इत्यानुपूर्व्येण अकारादयो यमपर्यवसानाः पूर्वाचार्यैरुपदिष्टा वर्णाः । यथा--अ आ आ३ इ ई ई३ उ ऊ ऊ३ ऋ ॠ ऌ ए ऐ ओ औ क ख ग घ ङ च छ ज झ ञ ट ठ ड ढ ण त थ द ध न प फ ब भ म य र ल व श ष स ह कं खं गं घम् ॥

अथ नवादितः समानाक्षराणि २

अथशब्दः संज्ञाधिकारार्थः । वर्णसमाम्नायस्यादितो नव वर्णाः समानाक्षरसंज्ञा भवन्ति । यथा--अ आ आ३ इ ई ई३ उ ऊ ऊ३ इति । समानाक्षरसंज्ञायाः प्रयोजनं वक्ष्यति--अप्रग्रहाः समानाक्षराण्यनुनासिकान्येकेषाम् । अत्र--

द्वे द्वे सवर्णे ह्रस्वदीर्घे ३

तेषु समानाक्षरेषु ह्रस्वदीर्घेषु द्वे द्वे सवर्णसंज्ञे भवतः । अ आ इति अन्योऽन्यस्य सवर्णः । ह्रस्वदीर्घे इत्यारब्धस्य द्वे द्वे इत्यनर्थकम् । अत्रोच्यते--द्वे द्वे इत्यनारभ्यमाणे ईकारोऽप्यकारस्य सवर्णः स्यात् । न खलु ईकारस्य आकारः सवर्णः अकारश्च तथा । आकारस्य अकारः

सवर्णः । आकारश्च तथा । एवमितरेषामपि ।
तस्मात् द्वे द्वे इत्यारभ्य सूत्रितम् । सवर्णसंज्ञायाः
प्रयोजनं वक्ष्यति -- दीर्घं समानाक्षरे सवर्णपरमिति ॥
न प्लुतपूर्वम् ४
न खलु प्लुतपूर्वं समानाक्षरं सवर्णसंज्ञं भवति ।
प्लुतमस्याः पूर्वमिति प्लुतपूर्वम् । यथा--अग्ना३ इत्याह
इत्यत्र दीर्घं समानाक्षरे सवर्णपरे इति वचनाद् दीर्घ
एकादेशः+++++++ प्रसक्तः । अनेन सूत्रेण तस्यां
सवर्णसंज्ञायां रतिषिद्धायां तु परिशेषात् इवर्णोकारौ
यवकारपरौ इति यत्वं भवति । लुप्येते त्ववर्णपूर्वौ
यवकारौ इति स च यकारो लुप्यते । लुप्ते यकारे न
प्लुतप्रग्रहौ इति एकादेशप्राप्तिः प्रतिषिधयते ॥
षोडशादितः स्वराः ५
सर्वस्य वर्णसमाम्नायस्यादितः षोडश ये वर्णाः ते
स्वरसंज्ञा भवन्ति । अकारादय औकारान्ताः ।
स्वरसंज्ञायाः प्रयोजनं वक्ष्यति--अथ स्वरपरो यकारमिति
॥
शेषा व्यञ्जनानि ६
स्वरेभ्यो योऽन्यो वर्णसमाम्नायराशिः स व्यञ्जनसंज्ञो
भवति । ककारादयो मपर्यन्ताः य र ल वाः ꣳक
श ष स ꣳप ह विसर्जनीया--नुस्वारनासिक्या इति ।
व्यञ्जनसंज्ञायाः प्रयोजनं वक्ष्यति--व्यञ्जनं स्वराङ्गमिति ॥
आद्याः पञ्चविंशतिः स्पर्शाः ७
व्यञ्जनानामाद्याः पञ्चविंशतिः ये वर्णाः ते स्पर्शसंज्ञा

भवन्ति । यथा ककारादयो मकारान्ताः । आदित इत्येव वक्तव्ये आद्या इति शब्दान्तरेण प्रयोजनं तेन विना कथं व्यञ्जनाधिकारस्यादित इत्येषोऽर्थो लभ्येत । स्पर्शसंज्ञायाः प्रयोजनं वक्ष्यति--स्पर्शपूर्वः शकारः छकारमिति

पराश्चतस्त्रोऽन्तस्थाः ८

अन्तिमाः श्लोकाः

पदक्रमविशेषज्ञो वर्णक्रमविचक्षणः
स्वरमात्राविभागज्ञो गच्छेदाचार्यसम्पदम् ६

पदक्रमविशेषज्ञः पदानां क्रमविशेषं यो वेत्ति
वर्णक्रमविचक्षणः यश्च वर्णानां क्रमविचक्षणः
स्वरमात्राविभागज्ञः यश्च स्वराणां विभागं वेत्ति
गच्छेदाचार्यसम्पदम् एवंविधः स खलु आचार्यसमीपं गच्छति । आचार्याः पुनर्व्यासप्रभृतयः । तेषां च ब्रह्मलोके स्थानम् यश्चेदं शास्त्रमधीते स अचार्यभूतः तेषां सदनं पूतो मेध्यो ब्रह्मणः सायुज्यं सालोक्यं च गच्छति ।

पदक्रमसदनम् ॥

इति छन्दोभाषाख्यायां प्रातिशाख्यव्याख्यायां द्वितीयप्रश्ने द्वादशोऽध्यायः ॥

इति माहिषेयकस्य छन्दोभाषायां भाष्यतश्चतुर्विंशोऽध्यायः प्रातिशाख्यं समाप्तम्

Reference:
V.V. Sharma, *Taittirīya Prātiśākhya with the Bhāṣya Padakramasadana of Māhiṣeya*, Panini: New Delhi, 1982.